# ગુરુ–અષ્ટકમ્

શરીરં સુરૂપં સદા રોગમુક્તં
યશશ્ચારુ ચિત્રં ધનં મેરુતુલ્યં ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૧ ।।

કલત્રં ધનં પુત્રપૌત્રાદિસર્વં
ગૃહં બાન્ધવા સર્વમેતદ્ધિ જાતમ્ ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૨ ।।

ષડંગાદિવેદો મુખે શાસ્ત્રવિદ્યા
કવિત્વં ચ ગદ્યં ચ પદ્યં કરોતિ ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૩ ।।

વિદેશેષુ માન્યઃ સ્વદેશેષુ ધન્યઃ
સદાચારવૃત્તેષુ મત્તો ન ચાન્યઃ ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૪ ।।

ક્ષમામણ્ડલે ભૂપભૂપાલવૃન્દૈઃ
સદા સેવિતં યસ્ય પાદારવિન્દમ્ ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૫ ।।

યશો મે ગતં દિક્ષુ દાન પ્રતાપાજ્જ
ગદ્વસ્તુ સર્વં કરે યત્પ્રસાદાત્ ।
ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં
તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૬ ।।

ન ભોગે ન યોગે ન વા વાજિમેધે

ન કાન્તાસુખે નૈવ વિત્તેષુ ચિત્તમ્ ।

ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં

તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૭ ।।

અરણ્યે ન વા સ્વસ્ય ગેહે ન કાર્યે

ન દેહે મનો વર્તતે મે ત્વનર્ઘ્યે ।

ગુરોરઙ્ઘ્રિપદ્મે મનશ્ચેન્ન લગ્નં

તતઃ કિં તતઃ કિં તતઃ કિં તતઃ કિમ્ ।। ૮ ।।